Begins on fol. 14*a* of the MS. described under No. 306.

First part ; complete.

No 581. नृसिंहतापिन्युपनिषद्भाष्यम्.
NṚSIṀHATĀPINYUPANIṢADBHĀṢYAM.

Substance, paper. Size, $12\frac{1}{8} \times 7\frac{5}{8}$ inches. Pages, 225. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 83*a*. The other works herein are: Siddhāntaśikhāmaṇiḥ (1*a*), Kālarātrikalpaḥ (204*a*), Bhuvanēśvarīkalpaḥ (218*a*), Mantramālikā 229*a*, Chinnamastākalpaḥ 256*b*, Haridrāgaṇapatikalpaḥ 268*a*.

Complete.

Beginning :

यन्नाम्नोपनिषत् स्याता तपनं तं विधिं गुरुम् ।
प्रणम्योपासनागर्भां तद्व्याख्यां श्रद्धयारभे ॥
आनुष्टुभात्सामराजान्नारसिंहादिदं जगत् ।
जातं यस्मिन् स्थितं लीनं नमस्तस्मै त्रिशक्तये ॥

भद्रं कर्णेभिरिति मन्त्रान्तर्गतभद्रपदव्याख्यानपरामृचमादितश्शान्तिं पठन्नन्याभ्यः श्रौतस्मार्तपौराणिककल्पशिक्षाप्रतिपादिताभ्यस्साकारब्रह्मविद्याभ्यः इयं शुभदेति दर्शयति भद्रं कर्णेभिरिति । भद्रं कल्याणं कर्णे-

भिरिति छान्दसं कर्णैः शृणुयाम शृणुमः देवास्संस्तुतो वयं भद्रं कल्याणं पश्येम पश्यामः . . . आपो वा इदमासन्नित्यादिना नृसिंहब्रह्मविद्याप्रकरणमाख्यायिकापूर्वकमवतारयति इयमुपनिषत् ।

End:

तादात्म्यपक्षे तु मन्त्रब्राह्मणयोर्यथास्वरूपं व्याख्येयम् । इतिशब्दो मन्त्रसमाप्तिं द्योतयति । तदेतन्निष्कामस्य भवतीति पदचतुष्टयाभ्यासस्सर्वोपनिषत्समाप्तिं द्योतयतीति सर्वं निर्मलं सिद्धम् ॥

Colophon:

इति गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य शङ्करभगवतः कृतौ आथर्वणपूर्वतापनीयोपनिषद्भाष्ये पञ्चमोपनिषत् समाप्ता.

विक्रमाब्दाश्वयुङ्मासप्रतिपत्सोमवासरे ।
रामचन्द्रोऽलिखत्स्वार्थं तापनीभाष्यमादरात् ॥

At the end of the commentary, a metrical version of the subjectmatter of the Upaniṣad, extending over six pages of 22 lines to a page and containing about 60 verses, is given in addition.

Beginning:

उदेति यस्मादखिलं सङ्कल्पादेव सन्ततम् ।
ब्रह्मणे श्रीनृसिंहाय नमस्तस्मै रजोजुषे ॥

ग्रन्थिश्शिखि(थि)लतामेति हृदयस्य यदि क्षणात् ।
विष्णवे श्रीनृसिंहाय तस्मै सत्त्ववते नमः ॥

End:

अञ्जलिर्वन्दनं मुष्टिः प्रधानं च चपेटिकम् ।
तर्जन्यास्फोटनं तद्वत् शङ्खं चक्रं गदाब्जके ॥
पाशाङ्कुशौ च मुसलं खड्गं चर्म सशार्ङ्गकम् ।
इषु चान्द्रं च वक्रं च दंष्ट्रा श्रीवत्सकौस्तुभौ ॥

लक्ष्मीर्योनिस्तथा धेनुः वरदाभयहस्तकौ ।
कर्णौ च केसराश्चैव वनमालाखगेश्वरौ ॥
उपसंहारमुद्रा च द्वात्रिंशत् परिकीर्तिताः ।

Beginning of the second part :

निरस्तनिखिलानर्थपरमानन्दरूपिणे ।
नृसिंहाय नमस्कुर्मः सर्वधीवृत्तिसाक्षिणे ॥
यत्पादाब्जरजोलेशसम्पर्कात्सहसा सकृत् ।
सर्वसंसारहीनोऽहं तान्नतोऽस्मि गुरून् सदा ॥
तापनीयरहस्यार्थविवृतिर्लेशतो मया ।
क्रियतेऽल्पधियान्तस्मात्क्षन्तव्यं क्षतमुत्तमैः ॥

इह पूर्वस्मिन् ग्रन्थे नृसिंहाकारब्रह्मविद्या निरुपाधिकब्रह्मविद्याफलाधिगता । तथाह्युक्तं वार्तिककृद्भिः

नृसिंहब्रह्मविद्यैषा व्याख्याता ज्ञानसिद्धये । इति
प्रणवस्य त्वनुष्टुबङ्गत्वेनैव तत्र तत्र प्रवेशः

End :

तापनीयरहस्यार्थदीपिका तिमिरापहा ।
गुर्वनुग्रहलब्धैषा सतामस्तु सुखाप्तये ॥
सच्चिदानन्दसम्पूर्णप्रत्यगेकरसात्मने ।
तेजसे महते भूयान्नमः पुंसिंहरूपिणे ॥
येषां संस्मृतिमात्रेण तरन्ति भवसागरम् ।
तान्नतोऽस्मि गुरून् भक्त्या धिया वाचा च कर्मणा ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छुकमुनीन्द्रशिष्यश्रीमद्गौडपादमुनिविरचिते उत्तरतापनीयविवरणे प्रथमः खण्डः ॥

No. 582. नृसिंहतापिन्युपनिषद्भाष्यम्.

NṚSIṀHATĀPINYUPANIṢADBHĀṢYAM.

Substance, palm-leaf. Size, $18\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 181. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1a. The other works herein are Viṣṇumātṛkānyāsaḥ 91a, Praṇavaviṣayaḥ (92a), Asaṁgātmanirasanam (98a).

Complete.

The verse specifying the date of transcription is identical with that found in the MS. described under the last number. Moreover this also gives the metrical paraphrase of the Upaniṣad found at the end of that codex. Therefore this seems to be the original from which that copy has been made.

The colophon is इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छुकमुनीन्द्रशिष्यगौडपादमुनिविरचिते उत्तरतापिनीयोपनिषद्विवरणे नवमः खण्डः ॥

No. 583. नृसिंहतापिन्युपनिषद्भाष्यम्.

NṚSIṀHATĀPINYUPANIṢADBHĀṢYAM.

Pages, 44. Lines, 12 on a page.

Begins on fol. 1a of the MS. described under No. 560.

Complete.

Another copy of the commentary by Śaṅkarācārya.

The colophon is इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशङ्करभगवतः कृतौ आथर्वणतापनीयोपनिषद्भाष्यं समाप्तम् ॥

No. 584. नृसिंहतापिन्युपनिषद्भाष्यम्.

NṚSIṀHATĀPINYUPANIṢADBHĀṢYAM.

Pages, 44. Lines, 7 on a page.

Breaks off in the third Upaniṣad of the first part.

Begins on fol. 79*a* of the MS. described under No. 316.

The colophon runs thus :—

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छङ्करभगवतः कृतावथर्वणोपनिषद्भाष्ये द्वितीयोपनिषद्व्याख्या समाप्ता ॥

No. 585. नृसिंहतापिन्युपनिषद्भाष्यम्.

NṚSIṀHATĀPINYUPANIṢADBHĀṢYAM.

Substance, paper. Size, 8½ × 10¾ inches. Pages, 114. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

The following colophon is found: इति श्रीमत्परमहंसपरिव्राजकाचार्यपरस्य गोविन्दभगवत्पूज्यपादशिष्यस्य भगवच्छङ्कराचार्यस्य कृतौ नृसिंहोत्तरतापनीयव्याख्यानं सम्पूर्णम् ॥

Begins on fol. 153*a*. The other works herein are Tripurāsiddhāntaḥ 1*a*, Lalitāsahasranāmōttarapīṭhikā with commentary 97*a*.

No. 586. नृसिंहतापिन्युपनिषद्भाष्यम्.

NṚSIṀHATĀPINYUPANIṢADBHĀṢYAM.

Substance, palm-leaf. Size, 16¼ × 1 inches. Pages, 187. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

The colophon is इति श्रीपरमहंसपरिव्राजकाचार्यपरस्य गोविन्दभगवत्पूज्यपादशिष्यस्य भगवच्छङ्कराचार्यस्य कृतौ नृसिंहोत्तरतापनीयव्याख्यानं सम्पूर्णम् ।

No. 587. नृसिंहतापिन्युपनिषद्भाष्यम्.

NṚSIṀHATĀPINYUPANIṢADBHĀṢYAM.

Substance, paper. Size, 7½ × 9½ inches. Pages, 21. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, not old.

Second part. It breaks off in the course of the second Khaṇḍa.

Begins on fol, 201*a*. The other works herein are: Jñānārṇavam (1*a*) Rajasvalāsnānavidhiḥ (121*a*), Ratirahasyam (129*a*), Paraśurāmasūtram (177*a*).

No. 588. नृसिंहतापिन्युपनिषद्दीपिका.

NṚSIṀHATĀPINYUPANIṢADDIPIKĀ.

Substance, palm-leaf. Size, 9 × 1⅜ inches. Pages, 346. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

A commentary on the Upaniṣad by Śaṅkarānanda, pupil of Ānandâtman.

Beginning:

ओं प्रायस्सगुणे ब्रह्मणि प्रवृत्ताः सकामाः । कामिनां चानर्थो भूयान् । निष्कामानामेव देवकृतविघ्नस्य(स्या)संभावितत्वात् । अतः संभावितानर्थपरिहारार्थं प्रथमतः शान्तिकरौ मन्त्रौ पठति । भद्रं कल्याणं कर्णेभिः कर्णैः उपासकानां बहुत्वाद्बहुवचनं शृणुयाम श्रूयास्म देवाः देवाश्च नारसिंहस्योपासकाः तद्ध्यानात् तादात्म्यं प्राप्ताः ॥

End:

तत्परमधामप्राप्तिरूपं फलमेतदिदानीमुक्तम् । निष्कामस्य सर्वाभिलाषरहितस्य भवति स्पष्टम्। नीपा(निष्का) मस्य भवति व्याख्यातम्। वाक्याभ्यास उपनिषत्समाप्त्यर्थः ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्री (शं)करानन्दभगवतः कृतौ पूर्वतापिन्युपनिषद्दीपिकायां पञ्चमोपनिषत् समाप्ता ।

समाप्ता च पूर्वतापिन्युपनिषत् ।

As the second part of the commentary is written here in continuation of the commentary on Pūrvatāpinī by Śaṅkarānanda, this may also be by the same author.

Beginning :

यदुत्तराध्वन्यतिकौशलानां व्यासादिकानां प्रणवप्रसिद्धाम् ।
नृसिंहरूपं तपनं भवाब्धेः वन्दे तदात्मोत्तरतापिनीयम् ॥
ग्रन्थोऽपि तस्योत्तरतापनीयनामा प्रसिद्धः प्रणवात्मसिंहान् ।
अभेदबुद्ध्योपदिशन् जनानां भूयान्मुदेऽनुष्टुभ उत्तरो यः ॥

देवा ह वै प्रजापतिमब्रुवन् अणोरणीयांसमिममात्मानमारभ्य उपद्रष्टारमात्रजेदित्यन्ता नवखण्डिकारूपोत्तरतापनीयोपनिषद् तस्या अर्थप्रकाशिकेयं दीपिका समारभ्यते ।

End :

उपद्रष्टारं तुरीयमविकल्पं वाङ्मनसातीतमपगतभेदवासनो निरिन्धनाग्निवदात्रजेत् अनुसमन्ताद्गच्छेत् । इति नवमः खण्डः ॥

Colophon :—उत्तरतापिनीव्याख्या समाप्ता ॥

No 589. नृसिंहतापिन्युपनिषद्विवरणम्.

NṚSIṀHATĀPINYUPANIṢADVIVARAṆAM.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 69. Lines, 30 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

A commentry on the Upaniṣad by Kṛṣṇācārya, son of Tirumalācārya.

Begins on fol. 1*a*. The other works herein are: Niruktam (37*a*), Vēdāṅgachandassūtram (44*a*), Vēdāṅgajyautiṣam (49*a*), Vyāsaśikṣāvyākhyānam (Vēdataijasam) (51*a*.)

Complete.

Beginning:

श्रीपाण्डुरङ्गं सर्वान्तरङ्गं सर्वाङ्गमङ्गलम् ।
इन्दिरामन्दिरं वन्दे वैदेहीवरसुन्दरम् ॥

गुरुःश्रीतिर्मलाचार्यसूर्यो मे शर्म यच्छतु ।
स्वान्तध्वान्तध्वंसकर्ता धर्ममार्गप्रदर्शकः ॥

गुरुश्रीतिर्मलाचार्यसूनुना कृष्णशर्मणा ।
अ(आ)थर्वणोपानिषदः श्रीमद्भाष्यमनूच्यते ॥

इह खलु संसारपारावारे निम(ग्न)धिकारिजनं जननी तनयमिव परमात्मतत्त्वज्ञानप्लवेनोद्दिधीर्षुरियमाथर्वणी मन्त्रोपनिषदितिकर्तव्यतामन्तरेण न तत्त्वज्ञानकारणतामापद्यते । अतः तदितिकर्तव्यतारूपन्यायगर्भं भाष्यं करिष्यन्नाचार्यः प्रारिप्सितपरिसमाप्त्यादिप्रयोजनमेतदुपानिषत्प्रातिपाद्यदेवताप्रणातिमादौ निबध्नाति आनन्दमिति ।

End:

मम सदा प्रेष्ठप्रेष्ठतम इति । अतिशयेन प्रियः प्रेष्ठः आतिशयेन प्रेष्ठः प्रेष्ठतमः प्रेष्ठात्प्रेष्ठतमः प्रेष्ठप्रेष्ठतमः निरतिशयप्रिय इत्यर्थ इत्यशेषमिति मङ्गलम् ॥

तातश्रीतिर्मलाचार्यगुरुप्रोक्तो मयाशयः ।
आथर्वणोपनिषदस्तद्भाष्यस्यापि दर्शितः ॥

Colophon:

इति श्रीतिर्मलाचार्यसूरिसूनुकृष्णाचार्यविरचितं श्रीमदाथर्वणोपनिषद्भाष्यविवरणं समाप्तम् ॥ श्रीसत्यपूर्णतीर्थगुरुभ्यो नमः

No. 590. पञ्चब्रह्मोपनिषत्.

PAÑCABRAHMŌPANIṢAD.

Pages, 5. Lines, 21 on a page.

Begins on fol. 144*a* of the MS. described under No. 246.

Complete.

This Upaniṣad describes the five manifestations of Śiva conceived as God, and teaches that the five syllabled Mantra-नमाईशिवाय-is the means of worshipping Him and of thereby attaining salvation.

Beginning:

सह नाववत्विति शान्तिः। अथ पैङ्गलादो भगवान् भो(ः)किमादौ किञ्जातमिति । सद्यो जातमिति । किम्भगव इति । अघोर इति । किम्भगव इति । वामदेव इति । किं वा पुनरिमे भगव इति । तत्पुरुष इति । किं वा पुनरिमे भगव इति । सर्वेषान्दिव्यानां प्रेरयिता ईशान इति ।

End:

अतश्च कारणं नित्यमेकमेवाद्वयं खलु ।
अत्र कारणमद्वैतं शुद्धचैतन्यमेव हि ॥

अस्मिन् ब्रह्मपुरे वेश्म दहरं यदिदं मुने ।
पुण्डरीकन्तु तन्मध्ये आकाशो दहरोऽस्ति तत् ॥

स शिवस्सच्चिदानन्दस्सोऽन्वेष्टव्यो मुमुक्षुभिः ।
अयं हृदि स्थितस्साक्षी सर्वेषामविशेषतः ॥

तेनायं हृदयं प्रोक्तं शिवस्संसारमोचकः ।
इत्युपनिषत् ॥

Colophon:—पञ्चब्रह्मोपनिषत्समाप्ता ॥

No. 591. पञ्चब्रह्मोपनिषत्.

PAÑCABRAHMŌPANIṢAD.

Pages, 2. Lines, 12 on a page.

Begins on fol. 168*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 592. पञ्चीकरणोपनिषत्.

PAÑCĪKARAṆŌPANIṢAD.

Pages, 8. Lines, 5 on a page.

Begins on fol. 18*b* of the MS. described under No. 202.

Complete.

This Upaniṣad explains how the diversity of the universe has resulted from the five homogeneous primary principles or elements by means of a process called Pañcīkaraṇa, *i.e.*, dividing each element into five portions and then combining them heterogeneously in certain different proportions.

Beginning:

पञ्चीकरणोपनिषत् ।

प्रपञ्चोत्पत्त्यपूर्वाणि सदर्थिंध परमेश्वर ।
निस्तरङ्गार्णवं तत्र मायाबीजसमुद्भवम् ॥
निर्णयित्वं सदोत्पन्नं तत् सर्वं या परोद्भवम् ।
तांस्तथा (तथाभूत) तत्त्वपञ्चीकारं तत् स्वयं याति पञ्चकम् ॥
प्रपञ्चं भूतमिश्रन्तु कुशलैः प्रेमलीलया ।
पञ्चीकरणसुनिर्माणं विश्वमव्याकृतं तदा ॥
एकैकं पञ्चपञ्चस्तु पञ्चविंशतिकरणया ।
भूतमुत्पन्नवद्रूपं पञ्चीकरणविधानकम् ॥

End :

पञ्चीकरणोपनिषत् हृदये गोप्या रक्षस्व च ।
सन्न्यासिनामिदं योगज्ञानैश्वर्यसुखप्रदम् ॥

पञ्चविंशतितत्त्वस्थो यत्र कुत्राश्रमे वसन् ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधस्स्थितधीर्मुनिरुच्यते ॥

चतुर्वेदधरो विप्रः सर्वशास्त्रविशारदः ।
आत्मतत्त्वं न जानाति दर्वी पाकरसं यथा ॥

Colophon :—इति पञ्चीकरणोपनिषत् संपूर्णा ॥

No. 593. परब्रह्मोपनिषत्.

PARABRAHMŌPANIṢAD.

Pages, 6. Lines, 19 on a page.

Begins on fol. 80*a* of the MS. described under No. 246.

Complete.

This Upaniṣad deals with the nature of the soul, of the Supreme Being, and of salvation ; and it explains also how this last is to be attained by one who, having become a Sannyāsin, has risen through the divine wisdom he has acquired, above the necessity of wearing the Śikhā, or the knot of hair on the head, as well as of wearing the Yajñōpavīta or the Brahminical sacred thread.

Beginning :

भद्रं कर्णेभिरिति शान्तिः ।

अथ हैनं महाकालाः(शालः) शौनकोऽङ्गिरसं भगवन्तं पिप्पलादं विधिवदुपपन्नः पप्रच्छ । दिव्ये ब्रह्मपुरे (के) सम्प्रतिष्ठिता भवन्ति कथं

(सृज्यन्ते) । नित्यात्मन एष महिमा । विभज्य एष महिमा विभुः क एषः । तस्मै स होवाच एतत्सत्यं यत्प्रब्रवीमि ब्रह्मविद्यां वरिष्ठाम्.

End:

एकयज्ञोपवीती तु नैव सन्न्यस्तुमर्हति ।
तस्मात्सर्वप्रयत्नेन मोक्षापेक्षी भवेद्यतिः ॥
बहिस्सूत्रं परित्यज्य स्वान्तस्सूत्रन्तु धारयेत् ।

बहिः त्रि(प्र)पञ्चशिखोपवीतित्वमनादृत्य प्रणवहंसशिखोपवीतत्वमवलम्ब्य मोक्षसाधनङ्कुरा(र्या)दित्याह भगवान् शौनक इत्युपनिषत् ॥

Colophon:—परंब्रह्मोपनिषत् समाप्ता.

No. 594. परब्रह्मोपनिषत्.

PARABRAHMŌPANIṢAD.

Pages, 3. Lines, 13 on a page.

Begins on fol. 146*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 595. परमहंसपरिव्राजकोपनिषत्.

PARAMAHAṀSAPARIVRĀJAKŌPANIṢAD.

Pages, 8. Lines, 20 on a page.

Begins on fol. 31*a* of the MS. described under No. 246.

Complete.

This Upaniṣad describes the rules relating to the initiation into the Sannyāsin's life, and gives the rules of conduct to be followed by Sannyāsins or the religious ascetics who have given up the world and adopted the life of renunciation.

Beginning :

भद्रं कर्णेभिरिति शान्तिः ।

अथ पितामहः स्वपितरमादिनारायणमुपसमेत्य प्रणम्य पप्रच्छ । भगवन् त्वन्मुखाद्वर्णाश्रमधर्मक्रमं सर्वं श्रुतं विदितमवगतम् । इदानीं परमहंसपरिव्राजकलक्षणं वेदितुमिच्छामि । कः परिव्राजनाधिकारी कीदृशं परिव्राजकलक्षणं कः परमहंसः परिव्राजकत्वं कथं तत्सर्वं मे ब्रूहीति । स होवाच भगवानादिनारायणः । सद्गुरुसमीपे सकलविद्यापरिश्रमज्ञो भूत्वा विद्वान् सर्वमैहिकामुष्मिकसुखश्रमं ज्ञात्वैषणात्रयवासनात्रयममत्वाहङ्कारादिकं वमनान्नमिव हेयमुपगम्य मोक्षमार्गैकसाधनो ब्रह्मचर्यं समाप्य गृही भवेत् ।

End :

देवतान्तरध्यानशून्यो लक्ष्यालक्ष्यनिर्वर्तकस्सर्वोपरतस्सच्चिदानन्दाद्वयचिद्घनस्संपूर्णानन्दैकरसो [यो] ब्रह्मैवाहमस्मीति अनवरतं ब्रह्मप्रणवानुसन्धानेन यः कृतकृत्यो भवति स परमहंसपरिव्राडित्युपनिषत् ॥

Colophon :—परमहंसपरिव्राजकोपनिषत् समाप्ता ॥

No. **596.** परमहंसपरिव्राजकोपनिषत्.

PARAMAHAṀSAPARIVRĀJAKŌPANIṢAD.

Pages, 3. Lines, 13 on a page.

Begins on fol. 132*a* of the MS. described under No. 247.

Complete.

No. **597.** परमहंसपरिव्राजकोपनिषत्.

PARAMAHAṀSAPARIVRĀJAKŌPANIṢAD.

Pages, 9. Lines, 5 on a page.

Begins on fol. 17*b* of the MS. described under No. 482.

Complete. Same as the last.

No. 598. परमहंसोपनिषत्.

PARAMAHAṀSŌPANIṢAD.

Pages, 3. Lines, 21 on a page.

Begins on fol. 18*a* of the MS. described under No. 250.

Complete.

This Upanisad lays down the rules of conduct relating to the Paramahaṁsa class of Sannyāsins.

Beginning:

पूर्णमद इति शान्तिः ।

अथ योगिनां परमहंसानां कोऽयं मार्गस्तेषां का स्थितिरिति नारदो भगवन्तमुपसमेत्योवाच । तं भगवानाह योऽयं परमहंसमार्गो लोके दुर्लभतरो न तु वाहुल्यो यद्येको भवति स एव नित्यपूतस्थस्स एव वेदपुरुष इति विदुषो मन्यन्ते महापुरुषो यच्चित्तं तत् सदा मय्येवावतिष्ठते ।

End:

दुःखे नोद्विग्नस्सुखे निस्पृहस्त्यागो रागे सर्वत्र शुभाशुभयोरनभिस्नेहो न द्वेष्टि न मोदते च सर्वेषामिन्द्रियाणां गतिरुपरमते य आत्मन्येवावस्थीयते तत्पूर्णानन्दैकबोधस्तत् ब्रह्मैवाहमस्मीति कृतंकृत्यो भवति कृतकृत्यो भवतीत्युपनिषत् ॥

Colophon:—परमहंसोपनिषत् समाप्ता ॥

No. 599. परमहंसोपनिषत्.

PARAMAHAṀSŌPANIṢAD.

Pages, 2. Lines, 11 on a page.

Begins on fol. 8*b* of the MS. described under No. 247.

No. **600.** परमहंसोपनिषत्.

PARAMAHAṀSŌPANIṢAD.

Pages, 3. Lines, 5 on a page.

Begins on fol. 21*a* of the MS. described under No. 300.

Complete. Same as the preceding.

No **601.** परमहंसोपनिषत्.

PARAMAHAṀSŌPANIṢAD.

Pages, 3. Lines, 7 on a page.

Begins on fol. 56*b* of the MS. described under No. 276.

Complete.

Another copy. The Śānti is herein given thus : सह नाववत्विति शान्तिः ।

No. **602.** परमहंसोपनिषत्.

PARAMAHAṀSŌPANIṢAD.

Pages, 4. Lines, 5 on a page.

Begins on fol. 21*b* of the MS. described under No. 482.

Complete.

Another copy. It begins :

अथ शुक्लयजुर्वेदे परमहंसोपनिषत् । पूर्णमद इति शान्तिः ।

No. **603.** परमहंसोपनिषत्.

PARAMAHAṀSŌPANIṢAD.

Pages, 2. Lines, 7 on a page.

Begins on fol. 70*a* of the MS. described under No. 256.

Complete. Same as the last.

No. 604. परमहंसोपनिषद्दीपिका.

PARAMAHAṀSŌPANIṢADDĪPIKĀ.

Pages, 17. Lines, 7 on a page.

Begins on fol. 71*b* of the MS. described under No. 316.

Incomplete.

A gloss on the Upaniṣad probably by Śaṅkarānanda.

Beginning:

साध्वी पारमहंसेति नामाङ्कोपनिषत्सु या ।
पदावलोकनात्तस्या अर्थमाविष्करोम्यहम् ॥

यद्यप्यपौरुषेये वेदे न कोऽपि वक्ता अत एव न प्राषि तथापि भ(भो)गस्थाननुजिवृक्षन्नेकं वक्तारमपरं प्रष्टारं च लोकवदङ्गीकृत्यास्तिक्यबुद्धिसंरक्षणार्थं ब्रह्मनारदौ प्रख्यातपुरुषौ सर्वज्ञतत्कल्पौ वक्तृप्रष्टारौ सङ्गृह्य परमहंसधर्मानाह ।

End:

साधूक्तं कृतकृत्यो भवतीति इयं परमहंसानां व्या. .

No. 605. पाशुपतब्रह्मोपनिषत्.

PĀŚUPATABRAHMŌPANIṢAD.

Pages, 9. Lines, 20 on a page.

Begins on fol. 75*b* of the MS. described under No. 246.

Complete.

This Upaniṣad treats of the characteristics of the Supreme Being, first from the Śaiva-Viśiṣṭādvaita point of view, and then from the Śaivādvaita point of view.

Beginning:

ओं भद्रं कर्णेभिरिति शान्तिः ।

अथ ह वै स्वयंभूर्ब्रह्मा प्रजाः सृजानीति कामकामो जायते कामेश्वरो वैश्रवणः वैश्रवणो ब्रह्मपुत्रो वालखिल्यः स्वयंम्भुं(म्भुवं) परिपृच्छति । जगतां

का विद्या का देवता जाग्रत्तुरीययोरस्य को देवः । यानि कस्य वशानि । कालाः कियत्प्रमाणाः । कस्याज्ञया रविचन्द्रग्रहादयो भासन्ते ।

End:

साक्षिरूपतया भाति ब्रह्मज्ञानेन बाधिता ।
ब्रह्मवित् ज्ञानसंपन्नः प्रतीतमखिलं जगत् ॥
पश्यन्नपि सदा नैव पश्यति स्वात्मनः पृथक् ॥ इत्युपनिषत् ॥

Colophon:—पाशुपतब्रह्मोपनिषत् समाप्ता.

No. 606. पाशुपतब्रह्मोपनिषत्.

PĀŚUPATABRAHMŌPANIṢAD.

Pages, 3. Lines, 13 on a page.

Begins on fol. 145*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 607. पैङ्गलोपनिषत्.

PAIṄGALŌPANIṢAD.

Pages, 15. Lines, 22 on a page.

Begins on fol. 281*b* of the MS. described under No. 250.

Complete.

Yājñavalkya explains to Paiṅgala herein how the material universe and the sentient individual soul are both evolved from the attributeless Smpreme Being, what the Mahāvākyas mean, and how a man of true wisdom should behave, and how others are to treat him.

Beginning:

ओं पूर्णमद इति शान्तिः ।

अथ ह पैङ्गलो याज्ञवल्क्यमुपसमेत्य द्वादशवर्षशुश्रूषापूर्वकं परमरहस्यकैवल्यमनुब्रूहीति पप्रच्छ । स होवाच याज्ञवल्क्यः सदेव सोम्ये-

दमग्र आसीत् । तं नित्यमुक्तमविक्रियं सत्यज्ञानानन्दं परिपूर्णं सनातनमेकमेवाद्वितीयं ब्रह्म ।

End:

ब्रह्महत्यासुरापानस्वर्णस्तेयगुरुतल्पगमनतत्संयोगपातकेभ्यः पूतो भवति । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत्परमं पदम् । ओं सत्यमित्युपनिषत् ॥

Colophon :—पैङ्गलोपनिषत् समाप्ता ॥

No. 608. पैङ्गलोपनिषत्.

PAINGALŌPANIṢAD.

Pages, 6. Lines, 12 on a page.

Begins on fol. 111*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 609. पैप्पलादोपनिषत्.

PAIPPALĀDŌPANIṢAD.

Pages, 2. Lines, 6 on a page.

Begins on fol. 33*a* of the MS. described under No. 217.

Incomplete.

In this Upaniṣad Brahman teaches Paippalāda that Rudra is the Supreme Being who is to be worshipped and meditated upon, and that He is superior to Viṣṇu.

Beginning:

अथ हैनं भगवन्तं पैप्पलादो ब्रह्माणमुवाच ब्रह्मविष्णुरुद्राणां मध्ये को वाऽधिकतरो ध्येयश्च । तस्मै स होवाच पितामहश्च ।

वहूनि पुण्यानि कृतानि येन तेनैव लभ्यः परमेश्वरोऽसौ ।
यस्याङ्गजोऽहं हरिरिन्द्रमुख्या मोहं न जानन्ति सुरेन्द्रमुख्याः ॥
प्रभुं वरेण्यं पितरं महेशं ममापि विष्णोर्जनकं देवमीड्यम् ।
यो अन्तकाले सर्वलोकान्संजहर्ति तस्मै रुद्राय नमो अस्तु ॥

End:

यो वामपादार्चितविष्णुनेत्रस्तस्मै ददौ चक्रमतीव हृष्टः ।
तस्मै रुद्राय नमो अस्तु ।
परात्परतरो ब्रह्म यत्परात्परतो हरः ।
तत्परात्परतरो (गि)रीशस्त(स्मै रुद्राय नमो अस्तु) ॥

No 610. प्रश्नोपनिषत्.
PRAŚNŌPANIṢAD.

Pages, 8. Lines, 15 on a page.

Begins on fol. 82*a* of the MS. described under No. 302.

Complete.

This Upaniṣad teaches that the matter of the body is animated by Prāṇa which is derived out of the Ātman (self), these together constituting the man of sixteen Kalas or component parts. It further mentions certain states of human consciousness, explaining them in accordance with this theory, and describes the value of the repetition of the Praṇava as a means to attain Mōkṣa by realising the nature of the Supreme Being, as herein described.

Beginning:

हरिः ओम् ॥ भद्रं कर्णेभिः शृणुयाम देवाः । . . शान्तिः ॥
ओं सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौसल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनस्ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नास्तान् सह ऋषिरुवाच भूय एव तपसा ब्रह्मचर्येण

श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान् पृच्छत यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति । अथ कबन्धी कात्यायन उपेत्य पप्रच्छ ।

End:

तान्होवाचैतावदेवाहमेतत्परं ब्रह्म वेद नातः परमस्तीति । ते तमर्चयन्तस्त्वं हि नः पिता योऽस्माकं विद्यायाः परं पारं तारयसीति । नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥ ओं भद्रं कर्णेभिः . . . दधातु ॥ ओं शान्तिः शान्तिः शान्तिः ।

Colophon :—प्रश्नोपनिषत्समाप्ता ॥

No. 611. प्रश्नोपनिषत्.
PRAŚNŌPANIṢAD.

Pages, 11. Lines, 5 on a page.

Begins on fol. 9*b* of the MS. described under No. 300.
Complete.

Very incorrect, imperfect and wrongly arranged.

The Śānti is not given.

No. 612. प्रश्नोपनिषत्.
PRAŚNŌPANIṢAD.

Pages, 14. Lines, 11 on a page.

Begins on fol. 105*a* of the MS. described under No. 180.
Complete.
The book is bound in the wrong way.
Another copy.

No. 613. प्रश्नोपनिषत्.
PRAŚNŌPANIṢAD.

Pages, 11. Lines, 8 on a page.

Begins on fol. 62*b* of the MS. described under No. 276.
Complete.
Another copy.

No. **614.** प्रश्नोपनिषत्.

PRAŚNŌPANIṢAD.

Pages, 5. Lines, 8 on a page.

Begins on fol. 109*a* of the MS. described under No. 304.

Complete.

Another copy.

No. **615.** प्रश्नोपनिषत्.

PRAŚNŌPANIṢAD.

Pages, 11. Lines, 7 on a page.

Begins on fol. 22*b* of the MS. described under No. 307.

Complete. Same as the last.

No. **616.** प्रश्नोपनिषत्.

PRAŚNŌPANIṢAD.

Pages, 9. Lines, 7 on a page.

Begins on fol. 10*b* of the MS. described under No. 256.

Complete. Same as the last.

No. **617.** प्रश्नोपनिषत्.

PRAŚNŌPANIṢAD.

Pages, 10. Lines, 13 on a page.

Begins on fol. 11*a* of the MS. described under No. 309.

Complete. Same as the last.

No. **618.** प्रश्नोपनिषद्भाष्यम्.

PRAŚNŌPANIṢADBHĀṢYAM.

Pages, 50. Lines, 12 on a page.

Begins on fol. 86*a* of the MS. described under No. 302.

Complete.

A commentary on the Upaniṣad by Śaṅkarācārya.

Beginning :

मन्त्रोक्तस्यार्थस्य विस्तरानुवादीदं ब्राह्मणमारभ्यते । ऋषिप्रश्नप्रति वचनाख्यायिका तु विद्यास्तुतयः एवं संवत्सरं ब्रह्मचर्यसंवासादियुक्तैस्तपोयुक्तैः ग्राह्यपिप्पलादवत्सर्वज्ञकल्पैराचार्यैः वक्तव्या च न येन केनचिदिति विद्यां स्तौति । ब्रह्मचर्यादिसाधनसूचनाच्च तत्कर्तव्यता स्यात् . . . .

End :

पिता शरीरमात्रं जनयति तथापि संपूज्यतमो लोके किमु तद्व्यक्तव्यमात्यन्तिकाभयस्य दातुरित्यभिप्रायः । नमः परमऋषिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो नमः ॥

Colophon :— इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीशङ्करभगवत्पादकृतावथर्वणोपनिषत्प्रश्नभाष्यविवरणं संपूर्णम् ।

No. 619. प्रश्नोपानिषद्भाष्यम्.

PRAŚNŌPANIṢADBHĀṢYAM.

Pages, 32. Lines, 9 on a page.

Begins on fol. 57*a* of the MS. described under No. 311.

Complete. Same as the last.

No 620. प्रश्नोपनिषद्भाष्यटिप्पणम्.

PRAŚNŌPANIṢADBHĀṢYAṬIPPAṆAM.

Pages, 29. Lines, 18 on a page.

Begins on fol. 37*a* of the MS. described under No. 332.

Complete.

For remarks and extracts about the work see pages 2 and 69 of the "Report on a search for Sanskrit and Tamil MSS. for the year 1896–97" by M Seshagiri Sastri.

No. 621. प्रश्नोपनिषद्भाष्यविवरणम्.

PRAŚNŌPANIṢADBHĀṢYAVIVARAṆAM.

Pages, 78. Lines, 17 on a page.

Begins on fol. *53a* of the MS. described under No. 632.

Complete.

This is a gloss on Śaṅkarācārya's Bhāṣya on the Praśnōpaniṣad, which is one of the ten principal Upaniṣads. It was written by Nārāyaṇēndrasarasvatī, pupil of Jñānēndra, whose preceptor was Kaivalyēndra. Nārāyaṇēndrasarasvatī was a Yati, and speaking of himself he says that he had acquired that knowledge of self by which he could become immortal, blissful, pure, infinite. The work is said to have been composed at the request of his pupils.

Beginning:

स्वपादसेविनां पुंसां स्वात्मबोधप्रसिद्धये ।
सेवितं दक्षिणामूर्तिं ज्ञानेन्द्रगुरुरूपिणम् ॥
मय्यारोप्य समस्तमद्वय इदं तस्मिन्प्रवेशान्मृषा-
शक्त्या जागरितादिदुःखमखिलं निर्विण्णधीर्दुःखतः ।
कोऽहं वेति विचार्य कार्यकरणग्रामात् पृथक्सर्वगः
प्रज्ञानैकरसं निरस्तनिखिलोपाधिः परं ब्रह्म च ॥
ज्ञात्वात्मानमहन्निजे परिमिते नित्ये सुखे निर्मले
सर्वानन्दनिधौ स्थितः समभवं श्रीवामदेवादिवत् ।
सोऽहं तत्त्वबुभुत्सुशिष्यपरिषत्संप्रार्थितः सम्प्रति
व्याकुर्वे ललितैः पदैः स्फुटतरं प्रश्नस्य भाष्यं मुदा ॥

ओम् अथर्वणे ब्रह्मा देवानामित्यादिमन्त्रैरेव आत्मतत्त्वस्य निर्णीतत्वात्तत्रैव ब्राह्मणेन तदभिधानं पुनरुक्तमित्याशङ्क्य तस्यैवेह विस्तरेण प्राणोपासनादि-साधनसाहित्येनाभिधानं न पौनरुक्त्यमिति वदन् ब्राह्मणमवतारयति मन्त्रेति । विस्तरेति । मन्त्रे हि द्वे विद्ये वेदितव्ये परा चैवापरा चेति ।

End:

तस्मादिति । पितृत्वादेव पूज्यतरत्वं परिचार्यत्वं स्वामित्वं किमु वक्तव्य-मित्यर्थः । अत एव वाजसनेयके मां चापि सह दारयेत्युक्तमिति भावः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकैवन्द्रेन्द्र(ल्येन्द्र)शिष्यज्ञानेन्द्र-गुरुचरणसेविनारायणेन्द्रसरस्वतीविरचितं प्रश्नोपनिषद्भाष्यविवरणं समाप्तम्.

No. 622. प्रश्नोपनिषद्भाष्यम्.

PRAŚNŌPANIṢADBHĀṢYAM.

Pages, 5. Lines, 12 on a page.

Begins on fol. 9*a* of the MS. described under No. 309.

Complete.

This is a metrical commentary on the Praśnopaniṣad by Ānandatīrtha in support of the Dvaita-Vēdānta.

Beginning:—

हरिः ओम् । नमो भगवते तस्मै प्राणादिप्रभविष्णवे ।
अमन्दानन्दसान्द्राय वासुदेवाय वेधसे ॥

प्रजानां पालनाद्विष्णुः प्रजापतिरितीरितः ।
स वायुं सूर्यनामानं चन्द्रनाम्नीं सरस्वतीम् ॥
सूर्याचन्द्रगतो देवस्ससर्ज पुरुषोत्तमः ।
तावाविश्य स्वयं विष्णुः सर्वसृष्टीः करोत्यजः ॥
अमूर्तस्थस्स वायुस्तु मूर्तसंस्था सरस्वती ।
आदित्यस्थः स वायुस्तु प्राणानात्मनि संनयेत् ॥
प्राच्यप्राणास्तथेन्द्राद्या दक्षिणाश्च यमादयः ।
प्रतीच्या वरुणाद्यास्तु सोमाद्या उत्तरे स्मृताः ॥

शेषमित्राववाचीनाविन्द्रकामावुदक्तनौ ।
सभार्याः कोणपैस्सार्द्धं चत्वारो दिशि दिश्यपि ॥
संवत्सरस्थो भगवान् वागीशावयनस्थितौ ।
मासस्थितस्स भगवान् पक्षयोर्वाक् च मारुतः ॥
अहोरात्रे तु भगवान् प्राणोऽह्न्यथ च वाग्निशि ।
दम्पत्योर्भगवान्विष्णुः भार्यास्था तु सरस्वती ॥
भर्तृस्थः स स्वयं वायुरेवं जानन्विमुच्यते ।
इति प्रजापतिसंहितायाम् ।

वायुरग्निरित्यत्र भूतवायुरुच्यते । प्राणशब्देन प्रधानवायुः । आत्मतः परमात्मतः ।

विष्णोर्वायुस्समुत्पन्नो वायोस्सर्वाश्च देवताः ।
प्राणाद्यास्तानयं प्राण आज्ञापयति राजवत् ॥

End:

पृथक् पृथक् नामरूपैः नमस्तस्मै पराय ते ।
इति च सत्तत्त्वे ॥

नामरूपाद्विमुक्त इत्यत्रापि नामरूपादमुक्तत्वमुच्यते विप्रिय इत्यादिवत् । नामरूपे अविहायेति पूर्वत्र अनन्तं वै नाम अनन्ता वै विश्वे देवा इति नामरूपयोरनन्तत्वं श्रुतिर्वक्ति । यत्र पूर्वे साध्यास्सन्ति देवाः । स तत्र पर्येति जक्षन् क्रीडन् रममाणः । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता । ऋचान्त्वः पोषमास्ते पुपुष्वान् । गायत्रं त्वा गायति शक्करीषु इत्यादेश्च । अतः सर्वमुक्तेभ्यो ह्युत्तमोत्तमः परिपूर्णगुणो नारायण इति सिद्धम् ॥

नमो नमोऽस्तु हरये प्रेष्ठप्रेष्ठतमाय मे ।
परमानन्दसन्दोहसान्द्रानन्दवपुष्मते ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितं षट्प्रश्नोपनिषद्भाष्यं समाप्तम्॥

No. 623. प्रश्नोपनिषद्भाष्यम्.

PRAŚNŌPANIṢADBHĀṢYAM.

Pages, 5. Lines, 10 on a page.

Begins on fol. 9*a* of the MS. described under No. 31.

Same as the last. Complete.

No. 624. प्राणाग्निहोत्रोपनिषत्.

PRĀṆĀGNIHŌTRŌPANIṢAD.

Pages, 5. Lines, 23 on a page.

Begins on fol. 146*a* of the MS. described under No. 246.

Complete.

This Upaniṣad explains the ritual of प्राणाग्निहोत्र or the worship of the fire of life as contained in the body; it identifies allegorically the various elements of life and of the human body with the various elements of the sacrifice and enjoins the performance of this worship of the fire of life as a means for obtaining the salvation of Mōkṣa without having to undergo any more re-incarnations.

Beginning:

सह नाववत्विति शान्तिः ।

अथातस्सर्वोपनिषत्सारं संसारे ज्ञानातीतमन्त्रसूक्तं शारीरयज्ञं व्याख्यास्यामः । यस्मिन्नेव पुरुषशरीरे विनाप्यग्निहोत्रेण विनापि साङ्ख्येन संसारविमुक्तिर्भवतीति स्वेन विधिनान्नं भूमौ निक्षिप्य या ओषधयस्सोमराज्ञीरिति तिसृभिः अन्नपत इति द्वाभ्यामनुमन्त्रयति ।

End:

सर्वाण्यस्मिन् देवताशा(श्श)रीरे अधिसमाहिताः ।
वाराणस्यां मृतो वापि इदं वा ब्राह्मणः पठेत् ॥

एकेन जन्मना जन्तुर्मोक्षं च प्राप्नुयादित्युपनिषत् ॥

Colophon:—इति प्राणाग्निहोत्रोपनिषत्समाप्ता ॥

No. **625.** प्राणाग्निहोत्रोपनिषत्.

PRĀṆĀGNIHŌTRŌPANIṢAD.

Pages, 2. Lines, 11 on a page.

Begins on fol. 169*b* of the MS. described under No. 247.

Complete. Same as the last.

No. **626.** प्राणाग्निहोत्रोपनिषत्.

PRĀṆĀGNIHŌTRŌPANIṢAD.

Pages, 2. Lines, 10 on a page.

Begins on fol. 12*a* of the MS. described under No. 203.

Another copy. Complete.

No. **627.** बह्वृचोपनिषत्.

BAHVṚCŌPANIṢAD.

Pages, 3. Lines 22 on a page.

Begins on fol. 199*a* of the MS. described under No. 246.

Complete.

This Upaniṣad teaches that Dēvī is the Supreme Being from whom proceed all the gods and all the various beings in the universe; it describes her as all-pervading and endeavours to identify the meaning of certain Dēvi-mantras with that of the Mahāvākyas.

Beginning:

ओं वाङ्मे मनसीति शान्तिः ॥ ओं देवी ह्येकाग्र आसीत् । सैव जगदण्डमसृजत । कामकलेति विज्ञायते । शृङ्गारकलेति विज्ञायते । तस्या एव ब्रह्मा अजीजनत् । विष्णुरजीजनत् । रुद्रोऽजीजनत् । सर्वे मरुद्गणा अजीजनन् ॥

End:

ब्रह्मानन्दकलेति । ऋचो अक्षरे परमे व्योमन् । यस्मिन्देवा अधि विश्वे निषेदुः । यस्तन्न वेद किमृचा करिष्यति । य इत्तद्विदुस्त इमे समासत इत्युपनिषत् ॥

Colophon :—हरिः ओं बह्वृचोपनिषत्समाप्ता ॥

No. 628. बह्वृचोपनिषत्.

BAHVṚCŌPANIṢAD.

Pages, 2. Lines, 13 on a page.

Begins on fol. 188*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 629. बृहज्जाबालोपनिषत्.

BṚHAJJĀBĀLŌPANIṢAD.

Pages, 24. Lines, 21 on a page.

Begins on fols. 37*a* and 51*a* of the MS. described under No. 250.

Complete.

It consists of 8 Brāhmaṇas.

The first portion commencing on fol. 37*a* breaks off in the 4th Brāhmaṇa, and the portion commencing on fol. 51*a* takes it up from where it breaks off and completes the Upaniṣad. This split-

ting up of the Upaniṣad seems to have been due to the reason pointed out under No. 415.

This Upaniṣad explains the origin of the sacred ashes of Śaivism kown as Bhasma or Vibhūti, its preparation, the deities presiding over it, the various ways in which it is to be used and the virtue or merit attached to its use, illustrating it all with a story; it also mentions the legendary origin of Rudrākṣa, and describes the merit that would accrue to the wearer of a string of Rudrākṣa beads.

Beginning:

भद्रं कर्णेभिरिति शान्तिः। आपो वा इदमासन् सलिलमेव। स प्रजापति-रेकः पुष्करपर्णे समभवत्। तस्यान्तर्मनसि कामस्समवर्तत। इदं सृजेयमिति। तस्माद्यत्पुरुषो मनसाभिगच्छति। तद्वाचा वदति। तत्कर्मणा करोति। तदेषाभ्य-नूक्ता। कामस्तदग्रे समवर्तताधि। मनसो रेतः प्रथमं यदासीत्।

End:

ब्रह्मादिवन्दितं योगिध्येयं परं पदं यत्र गत्वा न निवर्तन्ते योगिनस्त-देतदृचाभ्युक्तम्। तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते। विष्णोर्यत्परमं पदम्। ओं सत्यमित्युपनिषत्। अष्टमब्राह्मणम्.

Colophon:— बृहज्जाबालोपनिषत् समाप्ता.

No. 630. बृहज्जाबालोपनिषत्.

BṚHAJJĀBĀLŌPANIṢAD.

Pages, 10. Lines, 11 on a page.

Begins on fol. 21*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 631. बृहज्जाबालोपनिषत्.

BṚHAJJĀBĀLŌPANIṢAD.

Substance, palm-leaf. Size, 14¼ × 1⅝ inches. Pages, 28. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains only 7 Brāhmaṇas, but is stated to be complete.

Begins on fol. 162*a*. The other works herein are Viṣṇupurāṇa (1*a*), Mātṛbhūtēśvarastōtram (160*a*), Rudrākṣadhāraṇavidhiḥ (176*a*), Haristutivyākhyā (177*a*), Śrutabōdham (229*a*).

No. 632. बृहज्जाबालोपनिषत्.

BṚHAJJĀBĀLŌPANIṢAD.

Pages, 28. Lines, 6 on a page.

Begins on fol. 23*b* of the MS. described under No. 285.

Contains only 7 Brāhmaṇas like the preceding.

No. 633. बृहदारण्यकोपनिषत्.

BṚHADĀRAṆYAKŌPANIṢAD.

Substance, palm-leaf. Size, 17⅛ × 1½ inches. Pages, 166. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

It consists of 6 Adhyāyas from the 3rd to the 8th Adhyāya of the Āraṇyaka of the Śuklayajurvēda.

After treating of अविद्या in the first chapter, this Upaniṣad gives in the next three chapters a lengthy discourse between Janaka Vidēha and Yājñavalkya regarding the true nature of the Supreme Being and of His relation to the universe; the fifth and the sixth chapters deal with a number of Upāsanas or modes of meditation and worship as leading to the salvation of

Mōkṣa or to the attainment of the highest wisdom which delivers one from the bondage of Karma and reincarnation.

Begins on fol. 1*a*. The other works herein are: Dadhivāmanastōtram (85*a*), Rāmakavacam (86*b*), Rāmabhujaṅgastōtram (88*b*), Gāyatrīsāvitrīsarasvatīkavacaḥ (90*a*), Rāmānusmṛtiḥ (90*b*), Rāmadurgāstōtram (91*b*), Prātassmaraṇīyastōtram (92*b*).

Beginning:

उषा वा अश्वस्य मेध्यस्य शिरस्सूर्यश्चक्षुर्वातः प्राणो व्यात्त(त्त)मग्निर्वैश्वानरः संवत्सर आत्माश्वस्य मेध्यस्य द्यौः पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यन्दिशः पार्श्वे अवान्तरदिशस्पर्शव ऋतवोऽङ्गानि मासाश्चार्द्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि ।

End:

समानमासाङ्गीविपुत्रात् । साङ्गीविपुत्रो माण्डूकायनेर्माण्डूकायनिः माण्डव्यान्माण्डव्यः कौत्सात्कौत्सिर्माहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणश्शाण्डिल्याच्छाण्डिल्यो वात्स्याद्वात्स्यः कुश्रेः कुश्रिर्यज्ञवचसो राजस्तम्बायनाद्यज्ञवचा राजस्तम्बायनस्तुरात्कावषेयात्तुरः कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः.

Colophon:—इति बृहदारण्ये अष्टमोऽध्यायः ॥

At the end there is an index, relating to the beginning of the Adhyāyas, followed by a few stray passages from the Yajur-Vēda extending over two pages.

No. 634. बृहदारण्यकोपनिषत्.

BṚHADĀRAṆYAKŌPANIṢAD.

Pages, 9. Lines, 5 on a page.

This MS. has been described under No. 306.

Begins on fol. 1*a*.

Contains from the 7th Khaṇḍa, 5th Brāhmaṇa, 6th Adhyāya, to the end of the Adhyāya.

Pages, 16. Lines, 7 on a page.

Begins on fol. 6*a*.

Contains the fifth Adhyāya ; complete.

Pages, 20. Lines, 7 on a page.

Begins on fol. 48*a*.

The sixth Adhyāya ; complete.

No. 635. बृहदारण्यकोपनिषत्.

BṚHADĀRAṆYAKŌPANIṢAD.

Pages, 25. Lines, 8 on a page.

Begins on fol. 75*a* of the MS. described under No. 276.

Contains only the sixth Adhyāya.

No. 636. बृहदारण्यकोपनिषत्.

BṚHADĀRAṆYAKŌPANIṢAD.

Pages, 105. Lines, 6 on a page.

Begins on fol. 13*a* of the MS. described under No. 304.

Complete.

Another copy.

The colophon herein runs thus:— इति वाजसनेयान्तर्गतकाण्वीये शुक्लयजुर्वेदे शतपथब्राह्मणे सप्तदशकाण्डे बृहदारण्यकाण्डे षष्ठोऽध्यायः ॥

No. 637. बृहदारण्यकोपनिषत्.

BṚHADĀRAṆYAKŌPANIṢAD.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 118. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Viṣṇupāramya-samarthanam (65*a*).

The leaves of the Upaniṣad and its commentary are mixed promiscuously, and the pages are not marked.

No. 638. बृहदारण्यकोपनिषत्.

BṚHADĀRAṆYAKŌPANIṢAD.

Pages, 132. Lines, 6 on a page.

Begins on fol. 56*a* of the MS. described under No. 458.

Complete.

Another copy.

No. 639. बृहदारण्यकोपनिषत्.

BṚHADĀRAṆYAKŌPANIṢAD.

Substance, paper. Size, $9\frac{3}{8} \times 6\frac{1}{8}$ inches. Pages, 140. Lines, 12 on a page. Character, Telugu. Condition, injured. Appearance, old.

Between the 4th and the 5th Adhyāyas, the 8th and the 7th Adhyāyas are again found written, beginning on fol. 42*a* and extending over 28 pages.

Begins on fol. 23*a*. The other works herein are Bṛhadāraṇyakōpaniṣadbhāṣyaṭīkā (1*a*), Bṛhadāraṇyakōpaniṣadbhāṣyam (93*a*).

Complete.

No. 640. बृहदारण्यकोपनिषत्.

BṚHADĀRAṆYAKŌPANIṢAD.

Pages, 22. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 292.

Contains the 6th Adhyāya of the Upaniṣad.

No 641. बृहदारण्यकोपनिषत्.

BṚHADĀRAṆYAKŌPANIṢAD.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 52. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the 5th and the 6th Adhyāyas of the Upaniṣad.

No. 642. बृहदारण्यकोपनिषत्.

BṚHADĀRAṆYAKŌPANIṢAD.

Pages, 18. Lines, 7 on a page

Several leaves are broken.

Begins on fol. 52*a* of the MS. described under No. 256.

Adhyāyas 6 to 8.

No. 643. बृहदारण्यकोपनिषत्.

BṚHADĀRAṆYAKŌPANIṢAD.

Substance, palm-leaf (Śrītāla). Size, 15⅜ × 2½ inches. Pages, 74. Lines, 11 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Khilarcaḥ 38*a*.

Complete.

The copying of this MS. is said to have been completed on Sunday (13th lunar day) the 14th of Māśi (February-March) of Kīlaka year by one Kaccapēśvaran.

No. 644. बृहदारण्यकोपनिषद्भाष्यम्.

BṚHADĀRAṆYAKŌPANIṢADBHĀṢYAM.

Pages, 472. Lines, 13 on a page.

Begins on fol. 93*a* of the MS. described under No. 639.

Complete.

This commentary is by Śaṅkarācārya.

Beginning:

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो नमो वंशऋषिभ्यो नमो गुरुभ्यः । ओम् उषा वा अश्वस्येत्येवमाद्या वाजसनेयब्राह्मणोपनिषत्तस्या इयमल्पग्रन्था वृत्तिरारभ्यते । संसारनद्या नि(वि)वृत्सुभ्यस्संसारहेतुनिवृत्तिसाधनविद्याप्रतिपत्तये सेयं ब्रह्मविद्योपनिषच्छब्दवाच्या तत्पराणां सहेतोस्संसारस्य अत्यन्तावसादनादुपनिपूर्वस्य सदेस्तदर्थत्वात् तादर्थ्याद्ग्रन्थोऽपि उपनिषदित्युच्यते। सेयं षडध्याय्यरण्येऽनूच्यमानत्वादारण्यकम् । बृहत्त्वात् परिमाणतो बृहदारण्यकम् । तस्या(ः) कर्मकाण्डेन सम्बन्धोऽभिधीयते ।

* * * *

अतोऽस्मात्क्रियाकारकफलरूपादेतावदिदमिति साध्यसाधनरूपाद्विरक्तस्य कामादिदोषकर्मबीजभूताविद्यानिवृत्तये रज्ज्वामिव सर्पज्ञानापनयनाय ब्रह्मविद्यारभ्यते.

प्रत्यग्गाढान्धकारप्रविघटनपटुज्ञानदानोत्सुकाभ्यां
सत्यज्ञानात्मकाभ्यां बहुविधजगतः कारणाभ्यां शिवाभ्याम् ।
कारुण्यश्रीकटाक्षामृतरसविलसल्लोचनाम्भोरुहाभ्यां
भूयो भूयः प्रकुर्मस्त्रिविधमपि नमोऽनीश्वराभ्यां गुरुभ्याम् ॥

तत्र तावदश्वमेधविज्ञानाय उषा वा अश्वस्येत्यादि । तत्र अश्वमधविषयमेव दर्शनमुच्यते प्राधान्यात् । अश्वस्य प्राधान्यं च तन्नामाङ्कितत्वात् क्रतोः । प्राजापत्यत्वाच्च उषा इति ब्राह्मो मुहूर्त उषा । वैशब्दः स्मरणार्थः

End:

यस्ते स्तन इत्यादिमन्त्रेण अथास्य मातरमभिमन्त्रयते इलासीत्यनेन तं वा एतमाहुरित्यनेन विधिना ।

ज्ञ(जा)तः पुत्रः पितरं पितामहं चातिशेते श्रिया यशसा ब्रह्मवर्चसेन च परमां निष्ठां प्रापदित्येवं स्तुत्यो भवतीत्यर्थः । यस्य चैवंविदो ब्राह्मणस्य

पुत्रो जायते तेन चैवं स्तुत्यो भवतीत्यध्याहार्यः । अष्टमस्य चतुर्थं ब्राह्मणम् ।

* * * *

नमो वंशऋषिभ्यो वेदाचार्येभ्यो नमः ।
नमस्तदनुवर्तिभ्यो गुरुभ्यो नम ऋषिभ्यः ॥

Colophon:

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशङ्करभगवतः कृतौ बृहदारण्यकटीकायामष्टमोऽध्यायः ॥ समाप्तोऽयं ग्रन्थः ॥

No. 645. बृहदारण्यकभाष्यटीका.

BṚHADĀRAṆYAKABHĀṢYAṬĪKĀ.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{5}{8}$ inches. Pages, 588. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

III to VII Adhyāyas.

A gloss on Śaṅkarācārya's commentary on the Upaniṣad by Ānandajñāna, pupil of Śuddhānanda.

Beginning:

यदविद्यावशाद्विश्वं दृश्यते रशनाहिवत् ।
यद्विद्यया च तद्धानिस्तं वन्दे पुरुषोत्तमम् ॥

नमस्त्रय्यन्तसन्दोहसरसीरुहबन्धवे ।
गुरवे परपक्षौघध्वान्तध्वंसपटीयसे ॥

भगवत्पादपादाब्जद्वन्द्वं द्वन्द्वनिबर्हणम् ।
सुरेश्वरादिसद्भृङ्गैः अवलम्बितमाभजे ॥

बृहदारण्यके भाष्ये शिष्योपकृतिसिद्धये ।
सुरेश्वरोक्तिमाश्रित्य क्रियते न्यायनिर्णयः ॥

ओं काण्वोपनिषद्विवरणव्याजेनाशेषामेवोपनिषदं शोधयितुकामो भगवान् भाष्यकारो विघ्नोपशमादिसमर्थं शिष्टाचारप्रमाणकं परापरगुरुनमस्काररूपं मङ्गलमाचरति । नमो ब्रह्मादिभ्य इति.

End:

भवद्भिराराधितो भवतां यथोक्तं फलं साधयिष्यामीत्याशङ्क्याह किन्त्विति । बहुमतत्वं भक्तिश्रद्धातिरेकयुक्तत्वम् । यागादिनापि परिचरणा क्रियतामित्याह अन्यदिति । सन्ततनमस्कारोक्त्या परिचरामेति पूर्वेण संबन्धः । अशक्तिश्च मुमूर्षावशादिति द्रष्टव्यम् । इतिशब्दोऽध्यायपरिसमाप्त्यर्थः ॥

Colophon:

इति श्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृतायां बृहदारण्यभाष्यटीकायां सप्तमोऽध्यायः ॥

नमद्बुद्ध्यादिसम्बन्धबन्धविध्वंसहेतवे ।
नित्यशुद्धचिदानन्दसिन्धवे हरये नमः ॥
वेदान्तशास्त्रसिद्धान्तसारसर्वस्वदायिने ।
अभेद्यहृदयग्रन्थिभेदिने गुरवे नमः ॥

Written on Monday, the 15th of Bhādrapada-Śuddha of Yuva Saṁvatsara, by Kōḍāli Rāmayya for Kōṭi Veṅkannanāyaka.

No. 646. बृहदारण्यकोपनिषद्भाष्यटीका.

BṚHADĀRAṆYAKŌPANIṢADBHĀṢYAṬĪKA.

Pages, 44. Lines, 15 on a page.

Begins on fol. 1*a* of the MS. described under No. 639.

Incomplete. Same as the last.

No. 647. बृहदारण्यकोपनिषद्व्याख्या.

BṚHADĀRAṆYAKŌPANIṢADVYAKHYĀ.

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 152. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains only the 5th and the 6th Adhyāyas.

This is a commentary, named Mitākṣara, on the Upaniṣad by Nityānandāśrama, pupil of Puruṣōttamāśrama.

Beginning:

एवमागमप्रधानेन मधुकाण्डेनोक्तमेवार्थमुपपत्त्या निरूपयितुं तत्प्रधानं मुनिकाण्डमारभ्यते । तत्रोपपत्तीनां वादजल्परूपेण द्वैविध्यात्मकत्वं च तमे (पञ्चमे)ऽध्याये जल्पकथायां युक्तयो निरूप्यन्ते । तन्निरूपणाय तत्प्रस्तावं कर्तुमाख्यायिकां विज्ञानस्तुत्यर्थं विद्याप्राप्त्युपायदानप्रदर्शनार्थं वा आश्वलब्राह्मणेनारचयति ।

End:

अन्यत् पाठान्तरमपि समानार्थं सुखबोधं चेत्युपरम्यते । एतावता परिसमाप्तो ब्रह्मविद्यारम्भः शास्त्रार्थस्सकलोऽपि ।

इति षष्ठाध्यायस्य पञ्चमब्राह्मणम् ।

अथ साङ्गोपाङ्गविद्याकथनानन्तरं याज्ञवल्कीयकाण्डस्य वंशः कथ्यते । शेषं मधुकाण्डवंशब्राह्मणवद्व्याख्येयम् । इति षष्ठाध्यायस्य षष्ठं ब्राह्मणम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपुरुषोत्तमाश्रमपूज्यपादशिष्यनित्यानन्दाश्रमविरचितायां मिताक्षरायां षष्ठोऽध्यायः ॥

No. 648. बृहदारण्यकोपनिषद्भाष्यम्.

BṚHADĀRAṆYAKŌPANIṢADBHĀṢYAM.

Substance, paper. Size, 7⅞ × 4⅜ inches. Pages, 190. Lines, 12 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old. The first leaf is lost.

Breaks off in the 8th Adhyāya.

This is a metrical commentary on the Upaniṣad by Ānandatīrtha.

Beginning :

. . . देवता एव सर्वशः ॥
तत्तन्नामैव नामैषां भिन्नानाम(विधा)नतः ।
नामानि तान्यपि हरेः स हि सर्वगुणाधिकः ॥
इति नारदीये.
उषा शिरो ब्रह्मविद्या तत्त्वमस्यादयोऽखिलाः ।
सप्तम्यर्थास्समुद्दिष्टाः पञ्चम्यर्थास्त . . . (था पुनः) ॥
षष्ठ्यर्थश्च चतुर्थ्यर्थः समानार्थश्च सर्वशः ।
तदैक्यवाचिवच्छब्दा अपि तद्वत्ववाचकाः ॥
सस्यार्था नैव ते सर्वे भिन्नरूपा यतः सदा ।
ईशाङ्गवाचिनो वास्यस्तेषामेव तदर्थतः ॥
सप्तसु प्रथमा यस्मात् तत्तद्योग्यार्थता भवेत् ।
इति ब्रह्मतर्के.

* * * *

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमद्बृहदारण्यकभाष्ये सप्तमोऽध्यायः ।

अहंश्रेयोविवादन्तु येन कृत्वाखिलास्सुराः ।
असमर्थास्स्वरक्षायां स वायुः सुरनायकः ॥
वि(व)दन्तोऽखिला देवा ययुर्नारायणं प्रभुम् ।

End :

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
तत्तद्दर्शितमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः

मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हि तेन प्रभौ ॥
हनुशब्दो ज्ञानवाची हनुमान् मतिश . . .

No. 649. ब्रह्मविद्योपनिषत्.

BRAHMAVIDYŌPANIṢAD.

Pages, 12. Lines, 21 on a page.

Begins on fol. 140*b* of the MS. described under No. 250.

Complete.

The first Khaṇḍa of this coincides with the Brahmabindūpaniṣad.

After explaining the greatness of the Praṇava, ओम्, this Upaniṣad teaches the Haṁsavidyā, which consists in repeating the word Haṁsa after performing certain Yōgic practices in respect of controlling the breath, &c., and explains its great value as a help to Yōga and self-realization. It eulogizes the Supreme Wisdom of the Supreme Being and points out that He is omnipenetrative as the Self of the Universe.

Beginning:

सह नाववत्विति शान्तिः । अथ ब्रह्मविद्योपनिषदुच्यते ।

प्रसादाद्ब्रह्मणस्तस्य विष्णोरद्भुतकर्मणः ।
रहस्यं ब्रह्मविद्यायां ध्रुवाग्निं संप्रचक्षते ॥
ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः ।
शरीरं तस्य वक्ष्यामि स्थानं कालत्रयन्तथा ॥

End:

सत्यस्वरूपचिन्मात्रसिद्धस्सर्वात्मकोऽस्म्यहम् ।
सर्वाधिष्ठानसन्मात्रस्वात्मबन्धहरोऽस्म्यहम् ॥

सर्वग्रासोऽस्म्यहं सर्वद्रष्टा सर्वानुभूरहम् ।
एवं यो वेद तत्त्वेन स वै पुरुष उच्यते ॥ इत्युपनिषत् ॥

Colophon :

ब्रह्मविद्योपनिषत्समाप्ता ॥

No. **650.** ब्रह्मविद्योपनिषत्.

BRAHMAVIDYŌPANIṢAD.

Pages, 4. Lines, 13 on a page.

Begins on fol. 60*a* of the MS. described under No. 247.

Complete. Same as the last.

No. **651.** ब्रह्मविद्योपनिषत्.

BRAHMAVIDYŌPANIṢAD.

Page, 1. Lines, 7 on a page.

Begins on fol. 60*b* of the MS. described under No. 285.

Complete.

The first 13 stanzas of this Upaniṣad are herein given under the name of Praṇavōpaniṣad.

End :

कांस्यघण्टानिनादस्य यथा लीयति शान्तये ।
ओंकारस्तु तथा योज्यः शान्तये सर्वमिच्छता ॥

यस्मिन् स लीयते शब्दः तत्परं ब्रह्म गीयते ।

ब्रह्म परं ब्रह्म स्थ लीयते ध्रुवं स्थ लीयते ब्रह्मणोऽमृतत्वाय कल्पते सोऽमृतत्वाय कल्पते सोऽमृतत्वाय कल्पत इति ।

Colophon :- प्रणवोपनिषत् समाप्ता ॥

No. 652. ब्रह्मबिन्दूपनिषत्.

BRAHMABINDŪPANIṢAD.

Pages, 2. Lines, 7 on a page.

Begins on fol. 15*a* of the MS. described under No. 322.

Complete.

This contains the first Khaṇḍa of the ब्रह्मविद्योपनिषत् but is called by a different name.

The colophon herein is ब्रह्मबिन्दूपनिषत्समाप्ता ॥

No. 653. ब्रह्मविद्योपनिषत्.

BRAHMAVIDYŌPANIṢAD.

Pages, 2. Lines, 6 on a page.

Begins on fol. 13*b* of the MS. described under No. 116.

Complete.

This is another copy of the preceding, but is called ब्रह्मविद्योपनिषत्.

No. 654. ब्रह्मविद्योपनिषत्.

BRAHMAVIDYŌPANIṢAD.

Pages, 3. Lines, 11 on a page.

Begins on fol. 128*b* of the MS. described under No. 180.

Complete.

No Śānti is given. This is like the work described under No. 652, but the following stanza is found in the beginning.

ओम् । ब्रह्मविद्यां प्रवक्ष्यामि सर्वज्ञानमनुत्तमम् ।
यत्रोत्पत्तिलयं चैव ब्रह्मविष्णुमहेश्वरान् ॥

No. 655. ब्रह्मोपनिषत्.

BRAHMŌPANIṢAD.

Pages, 4. Lines, 21 on a page.

Begins on fol. 1*a* of the MS. described under No. 250.

Complete.

This Upaniṣad teaches the undifferentiated oneness of the Supreme Being and teaches also that, in the case of the man who has obtained this knowledge, the external marks and the ritualistic symbols of the Brahminical life are not at all required.

Beginning:

ब्रह्मकैवल्यजाबालश्वेताश्वो हंस आरुणिः ।
गर्भो नारायणो हंसो बिन्दुनादशिरः शिखा ॥

ओं सह नाववत्विति शान्तिः ।

अथास्य पुरुषस्य चत्वारि स्थानानि भवन्ति । नाभिर्हृदयं कण्ठं मूर्धा च । तत्र चतुष्पादं ब्रह्म विभाति । जागरिते ब्रह्मा । स्वप्ने विष्णुः । सुषुप्तौ रुद्रः । तुरीयमक्षरम् ।

End:

सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम् ।
आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परम् ॥

तद्ब्रह्मोपनिषत्परमिति ॥

Colophon:— ब्रह्मोपनिषत् समाप्ता ॥

No. 656. ब्रह्मोपनिषत्.

BRAHMŌPANIṢAD.

Pages, 2. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 217.

Complete. Same as the last.

No. 657. ब्रह्मोपनिषत्.

BRAHMŌPANIṢAD.

Pages, 4. Lines, 5 on a page.

Begins on fol. 25*a* of the MS. described under No. 139.

Complete.

In the beginning the Śānti is given as भद्रं कर्णेभिः &c.

No. 658. ब्रह्मोपनिषत्.

BRAHMŌPANIṢAD.

Pages, 3. Lines, 5 on a page.

Begins on fol. 19*b* of the MS. described under No. 300.

Complete.

No. 659. ब्रह्मोपनिषत्.

BRAHMŌPANIṢAD.

Pages, 7. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 401.

Complete.

The following Śāntis are given at the beginning :—

1. सह नाववतु, &c.
2. भद्रं कर्णेभिः, &c.
3. नमो ब्रह्मादिभ्यः नमो गुरुभ्यः, &c.
4. यो ब्रह्माणं विदधाति पूर्वम्, &c.

No. 660. ब्रह्मोपनिषत्.

BRAHMŌPANIṢAD.

Pages, 3. Lines, 6 on a page.

Begins on fol. 14*a* of the MS. described under No. 116.

Complete

No. 661. ब्रह्मोपनिषत्.

BRAHMŌPANIṢAD.

Pages, 2. Lines, 8 on a page.

Begins on fol. 41*b* of the MS. described under No. 534.

Complete.

No. 662. ब्रह्मोपनिषत्.

BRAHMŌPANIṢAD.

Pages, 2. Lines, 8 on a page.

Begins on fol. 51*b* of the MS. described under No. 276.

Complete.

No. 663. ब्रह्मोपनिषत्.

BRAHMŌPANIṢAD.

Pages, 2. Lines, 8 on a page.

Begins on fol. 61*a* of the MS. described under No. 256.

Complete. Same as the last.

No. 664. ब्रह्मोपनिषद्दीपिका.

BRAHMŌPANIṢADDĪPIKĀ.

Pages, 17. Lines, 7 on a page.

Begins on fol. 40*a* of the MS. described under No. 316.

Complete.

This commentary is by Śaṅkarānanda, pupil of Ānandātman.

Beginning:

कृष्णद्वैपायनं व्यासं शङ्करं लोकशङ्करम् ।
आनन्दात्मानमव्यात्मा(न्मा) गुरुं देवं नतोऽस्म्यहम् ॥
ब्रह्मोपनिषदं नाम ब्रह्मात्मैक्यावबोधिनीम् ।
व्याकरिष्यामि तेनेदं ब्रह्म तुष्यतु सर्वगम् ॥

त्वं ब्रह्मासीत्युक्ते अनधिकारिणः कर्तृत्वादिविपरीतज्ञानवतो योगत्वेनै-तद्बोधो जायते । ततोऽन्यबोधोत्पादनार्थं नाभ्यादिस्थानान्युररीकृत्य विविधो-पायानाह । अथ उपनिषदारम्भे श्रुत्या मङ्गलप्रयोजनोऽथशब्दोऽधिकारिण-माह ।

End :

तद्ब्रह्मोपनिषत्पदं व्याख्यातम् । पदाभ्यास उपनिषदर्थपरिसमाप्त्यर्थः । इतिः उपनिषत्समाप्त्यर्थः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृतिर्ब्रह्मोपनिषद्दीपिका समाप्ता ॥

No. **665.** ब्रह्मोपनिषद्दीपिका.
BRAHMŌPANIṢADDĪPIKĀ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 183*a* of the MS. described under No 316.

This is the last portion of the commentary noticed under the last number.

No. **666.** ब्रह्मोपनिषद्दीपिका.
BRAHMŌPANIṢDDĪPIKĀ.

Pages, 20. Lines, 18 on a page.

Begins on fol. 73*a* of the MS. described under No. 412.

Complete.

This is a copy of the MS. described under No. 664.

No. **667.** भस्मजाबालोपनिषत्.
BHASMAJĀBĀLŌPANIṢAD.

Pages, 14. Lines, 18 on a page.

Begins on fol. 117*b* of the MS. described under No. 246.

Complete.

In this Upaniṣad Paramēśvara teaches Bhusuṇḍa Jābāla that Śiva is the Supreme Being who transcends Brahmā, Viṣṇu and Rudra, that His devotees should necessarily besmear their body with the sacred ashes (भस्म), that the six-syllabled and eight-syllabled Mantras—ओं नमः शिवाय and ओं नमो महादेवाय - should be repeated by them, and that they should all worship the Liṅga as a means of representing Him who is really unrepresentable.

Beginning:

भद्रं कर्णेभिरिति शान्तिः ।

